# कालिदाससाहित्ये चैतन्यदर्शनम्

डॉ जनार्दन प्रसादपाण्डेय "मणि"

चैतन्यं नाम प्रतिभासमानं किमपि महनीयं तत्त्वं निश्चप्रचमेतस्य निखिलस्य ब्रह्माण्ड[1] भाण्डस्य । लोकेषु यत्रकुत्रापि दरीदृश्यते स्पन्दनं तत्सर्वमपि स्पन्दनं वस्तुतश्चैतन्योद्भवं चैतन्यान्वयं चैतन्यस्वभावं चैतन्यकृपाकटाक्षपर्यन्तमेव धृतजीवितं चैतन्यगर्भ एव प्राप्त पर्यवसानमनुभूयते बुधैः । वैय्याकारणानां दृष्ट्या तु चिद् धोतोर्ल्युट् प्रत्यये कृते निष्पन्नाच्चेतनशब्दात् ष्यञ् प्रत्यये विहिते भाववाचि चैतन्यमिति पदं प्रथमायां विभक्त्यामेकवचने नपुंसकलिङ्गे स्वस्वरूपं लभते । तत्त्वान्वेषिण्याः भारतीयमनीषाया दार्शनिके मञ्चे विशेषतो वेदान्तसंसारे कृचिद् ब्रह्मरूपे कृचिद् जीवरूपे, क्वचित् परमात्मरूपे क्वचिदात्मरूपे क्वचिच्चेश्वरादिरुपेषु समष्टिव्यष्टिमयुपहितममुपहितमिदं चैतन्यतत्त्वं विभ्राजते।[2] स्थिति वैशिष्ट्यान्निमित्त कारणमुपादान कारणञ्च चैतन्यमेव जगताम् ।[3] तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति गायन्ती भगवती श्रुतिश्चैतन्य पुरूषस्य परात्परपरमेश्वरस्य सर्वमयत्वं समग्र प्रपञ्चाधिपत्वञ्च सुष्ठु प्रमाण्यति सत्स्वप्युपाधिभेदेषु संज्ञकानां चैतन्यरूपतायां न कोऽपि भेदः । चैतन्यकुक्षावेव सदा श्वसिति चैतन्यावृतमनन्तं ब्रह्माण्ड मपरिमितं लोकसङ्धातजातम् । चैतन्यमेव ज्योतिर्महज्योतिः स्वयंज्योतिर्ज्योतिरेवात्माऽयमात्मैव पुरुषः सहस्राक्षः[4] ।अनया दर्शनरीत्या न कुत्रचित् कश्चिदपि सन्देहावकाशश्चि-रन्तपद्धतौ चैतन्यचिन्तनस्य किं वा तद्दर्शनस्यसत्यम् । अत्र वेदादारभ्या-धुनिककालं यावद्योऽयं सारस्वतयागः प्रचलति, यं वाणी यजते स्वयं प्रयत्नतः सर्वेऽप्ययं वस्तुतच्चैतन्यस्यैव दर्शनम् । तद्रहस्य पयः पारावारेऽहर्निशं मज्जन्ति मुनयो योगिनो ऽनुभवन्ति परमानन्दं साक्षात्कुर्वन्ति भगवतो विग्रहम् । चैतन्यविषयिणीयं शाश्वती धारणा शोधविषयस्यैस्य तां भावशमिं पुष्णति, तां पृष्ठभूमिमनुयाति, यत्प्रसादतः कविकुलगुरुकालिदाससाहित्ये प्रवेशो भवितुं शक्यते ।

यतो हि कालिदास एव संस्कृतसाहित्यस्य स प्रथमः कविर्यदभिधाने तद्भक्तिनिष्ठाव्यञ्जको दास शष्दो विभाति चरमोत्कर्षतः प्राप्तोत्तर-पदत्वसौभाग्यलाभ; पूर्वपदत्वे तु तस्य चैतन्यस्यैव चकास्ति संज्ञा । विश्वस्मिन् निखिलेऽपि संस्कृते जगति तथा चान्येषु भाषासाहित्येषु कालिदासकवित्वकीर्ति कौमुदी सोल्लासं नृत्यति, नन्दयन्ती भाव लोकं तनोति सहृदयसाम्राज्यं सर्वदा रसात्मकं शुद्धबुद्धचैतन्यं रसब्रह्म प्रति । रस एवासीत् साक्षात्कारं विषयस्तज्जीवनस्य, सकलप्रयोजनमौलिभूतं तत्त्वञ्च तस्य महाकवेः साधनासंसारस्य । रसैकधर्मी कविरयं स्वकीये काव्यालोके काव्यात्मभूतस्य रसस्य वात्सल्यं सर्वत्रानुभवति । काव्यात्मभूतरसव्याजेन कालिदासो निसर्ग चैतन्यस्य तस्य रसब्रह्मणो वात्सल्यामृतं सुष्ठु पिबति । रसो वैसः इति निगदन्ती भगवती श्रुतिश्चैतन्य पुरुषस्य रसरुपत्वं सर्वतोभावेन विज्ञापयति ।

वस्तुतः कविस्तु गोरूपाया भगवत्या वाग्देवताया निसर्गोच्चालितमौधस्यं धृतगोवत्सविग्रहो निरन्तरं पिबत्येव रसाभिधानतः । तस्य स रसास्वादो योगिनां प्रयत्नसापेक्षाद्रसपानाद् विलक्षणतरएवभवति । वाग्धेनुरत्यन्तं स्निह्यतिस्म कालिदासे कवावत एव कालिदासस्य तद्दुग्धपयः पानत्वं किमप्यधिकतरमेवानुमीयते तत्पूर्वकालिकै विद्वद्भिरालोचकैश्च लोके । भरतरससूत्रव्याख्या-कारस्याचार्यभट्टनायकस्य कदाचिदेवंविधै-वावधारणा आसीत् ।[५] भरतमुनिस्तु प्रवर्तमानं काव्यार्थं रसरूपमेव मन्यते स्म[६] । काव्यशास्त्र पितामहत्वात्तदुक्तीनां मौलिकत्वं काव्यशास्त्रिभिः सम्यक् समीक्षितम् । "वागेव विश्वा भुवनानीति" ख्याता श्रुतिभणितिं मन्यमानोऽयं मुनिः स्वीये नाट्यशास्त्रे वाचमेव वाक्तत्त्वमेव सर्वेषां कारणत्वरूपे स्वीकरोति[७] । अत्रवाक्तत्त्वं चैतन्यब्रह्मणः स्वरूप मादत्ते । अक्षरशष्दार्थ-विद्भिर्महावैय्याकरणैर्भर्तृहरिभिरियमुद्भावना स्वकी यैर्गभीरैस्तर्कैर्विधिवदभि-प्रमाणिता[८] । साक्षात्कृतिरप्यक्षरब्रह्मणः सर्वा-त्मनासम्पादिता ।

अत्रेदं तथ्यं विशेषेण ध्यातव्यं वर्तते यदिदं समग्रमपि दर्शनजातं श्रुतिसम्मतं यत्रकुत्रचिद्वेदान्तप्रतिष्ठितं च वरीवर्ति । काव्यशास्त्रीयं चिन्तनमपिदर्शनसरणौ श्रुति प्रातिनिध्यमेवाङ्गीकरोति ।

महाकविः कालिदास सानन्त्यं भजमानायां स्वकवितायात्रायां वेदवेदाङ्ग-रहस्यरत्नैः साकं कदाचिद् बालभावेन, कुत्रचित्तरूणभावेन क्वचिच्च प्रौढभावेन क्रीडन् सर्वेषांसमन्विर्तिं. सङ्कलयन्स्वरचनोत्सङ्गे रसाध्वनि प्राचलत् ! रसात्मकं वाक्तत्वात्मकं तुरीयमनुपहित चैतन्यमद्वैतं शिवं तथा च तच्छक्तिं कविरयं स्वकीयस्य महाकाव्यस्य प्रथमश्लोके प्रणनाम[९]। वागर्थप्रतिपत्तिरत्र ज्ञानस्वरूपस्य रसब्रह्मणः साक्षात्कृतिः, उपहित - चैतन्यस्यानुपहित चैतन्यावाप्तिः, व्यष्ट्ययुपहित चैतन्यस्य तुरीयचैतन्यस्तुतिः । भवन्तु नामोपाधिभेदाः स्थलेस्थले, किन्तु सर्वत्राद्वैतवेदान्तिनस्तस्य कवेश्चैतन्यर्शनं तु समुल्लसत्येव तन्निसर्गजे साहित्यद्रुमे । रघुवंशमहाकाव्यस्यादौ रघुवंशेश्वरस्यभिवन्दनं रसजीवित-भूतमौचित्यं नितरां व्यञ्चयति [१०] । एतत्पूर्व विरचिते विक्रमोर्वशीयमित्यादये नाटके कविर्वेदान्त प्रतिष्ठितमेकपुरूषं शिवं समेषां निःश्रेयसे स्मृत[११]वान् ।

वस्तुतो नाट्याभिनेतृणां नाट्यदर्शनोत्सुकानाञ्च कल्याणाय मङ्गलाय महाकविरत्र स्वकीयमिष्टं पृथिवीमन्तरिक्षं सर्वतो भावेन व्याप्य विराजमान-मुपनिषत्सु ब्रह्मरुपमेकपुरुषपदं प्राप्य पूजमानमीशं शिवं प्रार्थयते । तस्यैकपुरुषस्य चैतन्यस्य शिवस्याज्ञानसमष्ट्या माययोपहितं रुपमेव ईश्वरः, अतएवासौ वर्तते्ऽनन्यविषयः । यथार्थाक्षरः शब्दः । भक्तियोगैकसुलभस्यस्यान्तस्तत्त्वं मोक्षार्थिभिः नियमितप्राणायामादिक्रियाभिरन्विष्यते । इतोऽपि पुर्वं महाकविः स्वीये मालविकाग्निमित्रमिति प्रथमे नाटके स्थाणोरेतस्य विरुद्धधर्मत्वमादौ प्रस्तुतवान्[१२]। स्वकीय चैतन्यं प्रति विस्मयमुत्पादयन् कविरत्र तस्यावाङ्मनसगोचरत्वमखिलाधारत्वं व्यञ्जितवान् । समर्थस्याप्यसामर्थ्यमै-श्वर्यवतोऽप्यैश्वर्यगोपनं मायामयत्वं केवलम्। चैतन्यस्यास्य विरुद्धधर्माश्रयत्वं तद्साधारणत्वमपरिमेयत्वमेव । एकैश्वर्यस्थितः प्रणतबहुफलः सन्नपि यः स्वयं चर्माम्बंर विभर्ति, कान्तासम्मिश्र-देहोऽर्धनारीश्वरविग्रहोऽपिविषय विरहितचेतानां योगिनामग्रेसरः, अष्टाभिस्तनुभिः कृत्स्नं जगद्बिभृदपियो निरभिमान चित्तः सएवसन्मार्ग प्रकाशनाय सर्वेषां जनानां तामसीवृत्तिं दूरीकर्तुं कविना प्रार्थितः । उपाधि भिन्नत्वे धर्मभिन्नत्वमस्य चैतन्यस्य

क्रान्तदर्शी कविः सम्यक्तया जानाति स्म । स्वकीये कुमारसम्भवमहाकाव्येऽपितदिदं वैलक्षण्यं विभूतिषु प्राकाम्यं प्रति महाकविना शोभनमुदीरितम्[१३] । चैतन्यस्य प्रायःप्रत्येकं पक्षाः कविना दृष्टाः, स्वकृतिषुचोद्धाटिताः ।

पराकाष्ठामुपगते स्वीये कवित्वे कालिदासो नाटकरत्नमौलिभूतं मधुक्षालितं यदभिज्ञानशाकुन्तलं नाम नाटकं विरचितवान्, तदादिमङ्गले नान्दीश्लोके, मालविकाग्निमित्र नाटकस्य नान्दीपाठे प्राप्तविषय प्रवर्तनस्याष्टमूर्तिस्वरूपस्या-भिधानपरिगणनपुरस्सरं गभीरां सूत्रात्मिकां व्याख्यां कृतवान् । महाकालाश्रये चैतन्य वरप्रसादादधिगत वाक्सिद्धिरयं कवयिता शिवमयं ब्रह्माण्डं, ब्रह्माण्डमयं शिवमत्र स्मरति । तं सर्वजनरक्षायै निवेदयति[१४] ।

चैतन्यं रक्ष्यः, चैतन्यंरक्षकः, चैतन्यंरक्षा, किं वा चैतन्यं दाता, चैतन्यं ग्रहीता, चैतन्यं दानमिदं सर्वमपि चैतन्यनीराजनं, चैतन्य चङ्क्रमणमिति कालिदासः सर्वत्र सिद्धी करोति। तत्काव्यचैतन्यं वरतन्तु चैतन्याद्ज्ञान चैतन्यं तथैव गृहीतवान् यथा लोकचैतन्यमिदं सूर्यचैतन्याज्ज्योतिश्चैतन्यं गृह्णाति[१५] ।

अभिज्ञानशाकुन्तलनान्द्यामष्टमूर्तेरीशस्य प्रथमां जलरूपां मूर्तिं विधातु; प्रथमां कृतिं स्वीकरोति । मन्त्रमाध्यमेनाहुतं हविर्मन्त्राहूतानिष्टानृदेवान् या प्रापयति, सा तनुरष्टमूर्तेर्द्वितीया मूर्तिरग्निरूपा विद्योतते । तृतीया यजमानरुपामूर्तिर्यत्कराभ्यां कश्चिद् यागः सम्पद्यते । चतुर्थी सूर्यरूपा मूर्तिः, पञ्चमी चन्द्ररूपा मूर्तिरिमे द्वे मूर्ती अहर्निशमृतु मासादिकं कालं जनयतः । षष्ठी मूर्तिराकाशरूपा या शब्दगुणा विश्वं व्याप्य स्थिता । सप्तमी मूर्तिः पृथिवीरूपा तनुः या तु सर्वेषां धान्यादीनां बीजानां प्रकृतिभूता कारणभूता विद्यते । अष्टमी शक्ति वायुरूपा तनुर्यया सर्वेऽपि प्राणिनः श्वसन्ति, सर्वाणि भूतानि जीवन्ति इमा अष्टमूर्तयः शिवस्य, ताभिरन्वितोऽयमष्टमूर्तिः । अष्टमूर्तयोऽज्ञानोपहित चैतन्यस्यैव सृष्ट्यपि चैतन्यरूपं ययुरिदमेव चैतन्यदर्शनमयमेव वाच्यार्थो मूलतः सर्वं खल्विदं ब्रह्म[१६] इत्यस्य श्रुतिवाक्यस्य ।

भारतवर्षस्यार्षसंस्कृत्यास्तपोमय्या निष्ठाया अमरोद्गायकोऽयं जटाजूटभक्तः कविर्वेदान्तेन सह मीमांसासांख्ययोगादीनां दर्शनानां क्रोडेष्वपि स्वचैतन्याभिवन्दनं

कुर्वन् यत्र तत्र तत्तद्दर्शनालोक कणान् वाग्व्यवहारे संयोजयन् सृष्ट्यां सर्वत्र जीवनमनुभवन् पायं पायं श्रीमद्भगवद्गीतामृतं ध्यायं ध्यायञ्च तदुद्घोषकं गोपवेषं योगेश्वरं सारस्वते पथि प्रवर्तितो बभूव । कुमारसंभवमहाकाव्ये यदा कालिदासस्य दृष्टिर्हिमालयं प्रति याति तु स तस्मिन् कमपि देवतात्मानं पश्यति । तद्दृष्ट्या सर्वशैलापृथिवीरूपां गां भास्वन्ति रत्नानि महौषधीश्च दोग्धुं विद्यमाने दोहदक्षे मेरौ हिमालयं पृथिव्या वत्समकार्षुः । सम्यक्तया सर्वाणि स्वाभीप्सितानि रत्नानि दुदुहुः ।[१७] अन्न सर्वेषु शैलेषु कश्चन चेतनः कविनावलोकितो नैसर्गिको वर्णनानन्दश्च चेतसा गृहीतः । रघुवंश महाकाव्ये मर्यादापुरुषोत्तमेन राज्ञा रामचन्द्रेण निर्वासिता कालिदासस्य सीता विलपति यदा तु तत्क्रन्दनमवलोक्य निखिलमप्येकान्तं वनप्राङ्गणं रोदिति । समदुःखभावं भजन्तो मयूरा नृत्यं त्यजान्ति, वृक्षाः कुसुमानि विजहन्ति, सर्वा हरिण्यः स्वमुखेभ्यः पूर्वं चर्वितान् ग्रासान् दर्भानुपात्तान् दुःखातिरेकादुद्गिरन्ति[१८] । अत्र प्रतीयते यत्खगमृगवृक्षेषु सर्वेषु कश्चन संवेदनशील आत्मा प्रतिष्ठितो वर्तते । किंवा महाकवेः प्रतिभया सर्वत्र चैतन्यमेव मृग्यते प्राप्यतेऽनुभूयते च । मेघदूतकाव्ये विरहकातरः कालिदासस्य यक्षो रामगिर्याश्रमे निवसन् स्वप्रियतमायाः कृते सन्देशं प्रेषयितुं मेघमेव दूती करोति । प्रत्यग्रैःकुटजकुसुमैस्तत्कृतेऽर्घं प्रयच्छति । प्रसन्नः सन् तस्य स्वागतं व्याहरति ।[१९] धूमज्योति; सलिलमरुतां सन्निपाते मेघे चैतन्यतत्त्वं विद्यमानमवलोक्य यक्षस्तं स्वसन्देशं कथयति । यद्यपि मेघस्य चैतनीकरणे यक्षस्य कामार्त्ततामुद्भावयति कविरत्रसिद्धान्त पक्षतः काम वैकल्यमन्त्रस्यागभीरां परिणतिं प्रतिपादयितुं कथञ्चित्[२०] किन्तु यक्षमुखान्त्प्रथमतस्तमुज्जयिनीं प्रेषयति तत्र महाकालमासाद्य संध्याकालीनायां तद्वन्दनार्चनायां पटहतां कर्तुं निवेदयति। निवेदनमिदंन कामार्तस्य यक्षस्य निवेदनमिदं तु महाकालभक्तस्य कालिदासस्य वस्तुतः । अतोमेघसन्दर्भे तच्चैतन्ये न कश्चिदपि सन्देहः कार्यः, यतोहि तस्मिन् स्मयमानं चैतन्यमवेक्ष्यैव महाकवेर्भक्तिभावना स्वकीयेष्टपूजनविधौ योगदानार्थं तं निवेदितवती । अग्रेऽपि यक्षमुखान्महाकविः कैलासक्रोडे शम्भुना दत्तहस्ताया भगवत्याः पार्वत्या मणितटारोहणे सोपानत्व साहाय्यहेतवे मेघं[२१] प्रार्थयते । नैकानि सन्त्येवंविधानि चैतन्यनिरीक्षणानि मेघस्वरुपे मेघदूते सत्यम् ।

वनस्पतिषु सर्वदा स्वचैतन्यालोकं पश्यतोऽस्य कवेर्यक्षिणी यत्र बालमन्दारवृक्षं कृतकतनयवत्यालपति पालयति[२२] तत्रैव पञ्जरस्थां सारिकां काच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति, मधुरं प्रश्नं पृच्छति[२३]। अभिज्ञानशाकुन्तले नाटके कालिदासस्य चरित्र नायिका शकुन्तला यत्राश्रम वक्षकेषु सुतरां स्निह्यति, तेषु सहोदरत्वं ज्येष्ठत्वं पुत्रत्वं च पश्यति तत्रैवाश्रममृगं विरहितस्वमातृत्वात् तस्य पुत्रवत्स्वीकृत्य परिपोषयति[२४]। वृक्षास्तत्प्रसाधनाया-भरणकान्यपि दत्तवन्तः[२५]। क्तता तत्र तस्याः भगिनी, चूतसङ्गतां तामवलोक्य सा मोमुदीति, पतिगृहगमनकाले तामालिङ्गति। विलक्षणेयं सङ्कलना बन्धुतायाः। एतस्या बन्धुताया मूले यः संवादः परिस्फुरति योऽन्तर्योगः समुल्लसति, स सर्वश्चैतन्यप्रकाशः केवलम् ।

किं नाम जडत्वमिदं त्ववलोक्यत एव न कालिदास कविताञ्चले । नवमालिकाया आम्राश्रयं शकुन्तलाया दुष्यन्तसौहृदं द्वयमपि समं पश्यति महर्षिः काश्यपोऽभिज्ञानशाकुन्तल नाटकस्य चुतुर्थाङ्के[२६]। शकुन्तलायाः पतिगृहगमन-काले तद्गमनानुज्ञाकृते लतावृक्षपादपान्निवेदयते। यतो हि तपोवनबन्धुभूतानां तेषां जलनदि सन्तुष्टिं विना सा जलं न पिबतिस्म, प्रियमण्डनासत्यपिस्नेह - वशात्पल्लवान्नादत्ते स्म तेषां पुण्योद्भवकाले सा प्रथममुत्सवमनुभवति स्म[२७] । वैलक्षण्यमिदं यत्तरवः परभृतमुरवादनुमति मपि तस्मिन्काले दत्तवन्तः[२८] । भवतु नाम काचिदप्येतेषां भाषा, किन्तु तद्भाषाभावग्राहितैव चैतन्योपस्थितिः सर्वत्रतस्यैव पुरस्कृतिः। श्रीमन्मुकुन्दलीलाललितकलेवरे महर्षिकृष्णद्वैपायन प्रतिभाप्रश्न-ग्रथितेऽस्मदार्षग्रथे श्रीमद्भागवते व्यासशुकदेव प्रसङ्गेतत्तत्तन्मयी भावस्य याभिव्यञ्जना समुद्घाटिता, चैतन्यसर्वमयताया यास्थितिः समुत्पादिता साकालिदासकृतिषु तत्तत्प्रसङ्गेषु प्रकृतिमानवयोः स्वच्छन्दं नरीनर्ति चैतन्यपदनूपरध्वनिरेव कालिदास कवित्वध्वनिः। नास्त्यत्र कश्चिदपि सन्देहलेशः ।

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैरिति नैकैः पंक्ति भावैर्वशिष्ठमुखादिन्दुमतीच्चिरविरह कातरजीवितमजमवबोधयता कविना जगतो मिथ्यात्वसिद्धान्ते जीवितं विकृतिरमानि मरणञ्च प्रकृतिरिति। अनेन

प्रतिपादनेनाशानसमष्टिव्यष्ट्युपहितचैतन्यप्रपञ्चे चैतन्यमभिवन्दतोऽप्यस्य कवेः प्रपञ्च प्रियतरत्वं नैवाङ्गीकरणीयमिति सूक्ष्मतया व्यज्यते । जननाभिलाषोऽप्यस्य सार्वभौमपक्षतो न सङ्केतमुपयाति । किन्त्वधिगते जन्मनिशक्तिशिवयोः स्त्रीपुरुषयोर्मध्ये विप्रयागो माभवत्वि[२९]तिरघुवंशमेघ[३०]दूतयोः काव्य-योर्नायिकानायकमुखात्प्रसङ्गापेक्ष्याभिव्यक्तवान्। नित्यसंयोगैकपक्षपाती सन्नपि यत्रकुत्रचिद्विशिष्ट वियोगवर्णनैः कृतंचित्तोद्रेकोऽयं मङ्गलमयपर्यवसानप्रियः सुखान्तकाव्यप्रणयनव्रतो महाकविर्जीवने स्त्रीपुरुषयोः सहस्थितिं सार्व-कालिकीमन्विति महर्निशमन्तसाभिलषति स्म । न विना विप्रयोगं सयोगः पुष्टिमश्नुते इति काव्यशास्त्रीयसिद्धान्तानां प्रायोगिकी मूर्छना कालिदाससहित्ये सततं रममाणा सहृदयहृदयसाम्राज्यं सुतरामावर्जयति । कविरयमासीत् श्रङ्गारी यस्माद्रसमयं सञ्जातमस्य काव्यजगदत एव कालिदासस्य प्रपञ्चप्रियत्वं नाङ्गीकरणीयमिति मम पूर्वोक्त्या न कदाप्ययमर्थः कथञ्चिद् ग्राह्यो यत्तस्मिन् कुतश्चिदपि निर्वेदकणिकाः प्रतीयमाना आसन् । वियोगविलोलचित्तस्य राज्ञोऽजस्य समक्षं महर्षिवशिष्ठस्य जीवनानित्यत्वसम्बन्धिती भणितिरजकृते सर्वथोपयोगिनी श्रेयस्करी चासीदिति मत्वैव महाकविप्रतिभया तानिरहस्यर-ञ्जितानि वचांसि प्रादुर्भूतानीति प्रतीयते । किन्तु स्वकाव्ययात्रयाः समापनकालेऽ-भिज्ञानशाकुन्तल नाटकस्य तदन्तिमे भरतवाक्य भूते श्लोके स्वपुनर्जन्म-विनाशनाय यथा नीललोहितः शिवो महाकविना प्रार्थितस्तेन तस्य धर्मार्थकाम-पुरुषार्थ सिद्धिद्वाराधिगत-जीवनसन्तुष्टिस्तदुद्भूतपुनर्जन्मनिर-भिलाषिताभिव्यक्ता शाश्वते ब्रह्मणि स्थितिं प्रदातुं क्षमस्य मोक्षलक्षणपुरुषार्थस्यावाप्तयेऽथवा सर्वथानित्यस्य दुःखैकसारस्य जीवनस्य पुनरप्राप्तये इति न ज्ञाने, केवलमिदमेव जाने यत् कवि

रयम् - प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सुखावगाहः क्षतवारिसञ्चयः ।[३१]
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाधकालः समुपागतः प्रिये !!

इत्यष्टमूर्तिष्वनन्यतमयोरज्ञानोपहित चैतन्ययोस्सूर्यचन्द्रयोर्नामस्मरण मुखादृतुसंहारात्कृतकाव्ययात्रारम्भः -

प्रवर्ततां प्रकृतिहितायपार्थिवः सरस्वती श्रुतिमहती महीयताम् !
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥

इत्यत्र तस्यैवस्वेष्टचैतन्यस्य ब्राह्मीमाहेश्वरी कौमारी वैष्णवीवाराही माहेन्द्री चामुण्डा - चण्डिकारुपाः शक्तयोऽथवा ज्ञानेच्छाप्रयत्न रूपाः शक्तयो यस्य परितो व्याप्तास्तदात्म भुवो नीललोहितस्य शिवस्य स्मरणेनाभिज्ञानशाकुन्तलस्य नाटकस्य भरतवाक्येन सह विराममेति। तत्रैव चानभिहितपूर्व स्वाभिलाषं विना कयाचिद्भूमिकयैव सहजतयाभिव्यक्तवान् । पुनर्जन्म विनाशनार्थं कृतनिवेदनोऽयं महाकवि; प्रकारान्तरेण सर्वप्रियं सर्वश्रेयस्करं स्वाभीष्टं परात्परे शिव एव स्वलयत्वमभीत्प्सितवान् । स्वीकृतमपि बभूव तदभीप्सितं भगवतः शरणे निश्चितं यतो हि कालिदाससदृशप्रतिभायाः कश्चिदपि-कविः पुनः धराधाम्नि जनिं नैवालभत ।

सत्यतः कालिदाससाहित्यस्य सर्वविधचिन्तनानन्तरं कथयितुमिम मेव शक्यते यत् -

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्म कर्मसमाधिना !!

इति श्रीमद्भगवद्गीता श्लोक एव कथाञ्चिद् महाकवेश्चैतन्यदर्शने व्याख्यामुखेन सर्वतोऽभि भासत इति शम् !!

१. एत एव स्वावरणभूतलोकालोक पर्वततद्बाह्यपृथिवीतद्बाह्यसमुद्रैः सहिता ब्रह्माण्डमुच्यते ।
- स्वामी - रामतीर्थः स्वटीकायाम्

२. यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्य-भिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति !! - तैतिरीयोपनिषद् ३-१-१
- आभ्यां महाप्रपञ्चतदुपहित चैतन्याभ्यां तप्तायः पिण्डवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्म इति वाक्यस्य वाच्यं भवति विविक्तं

सल्लक्ष्यमपि भवति !!

- अज्ञानोपहितं चैतन्यमात्मेति वदन्ति !!
- विषयो जीव ब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां पर्यायात् !
- समष्ट्युपहितं सर्वज्ञत्व सर्वेश्वरत्व सर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् यः सर्वज्ञः सर्ववित् इति श्रुतेः, चैतन्यम् !!

व्यष्ट्युपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एक ज्ञानावभासकत्वात् - वेदान्तसारः

३. शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्व प्रधानतया निमित्तं स्वोपाधि प्रधानतयोपादानं च भवति । - वेदान्तसारः

४. अत्रायं पुरुषः स्वयंज्योतिः । बृहदारण्यकोषनिषद् ४-३-९

५. वाग्धेनुर्दुग्ध सतं हि रस यद्बालतृष्णया !
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि सः ॥ - भट्टनायकः

६. नहि रसादृते कश्चिदर्थ; प्रवर्तते !! - आचार्योभरतमुनिः, नाट्यशास्त्रे, षण्ठाध्याये

७. वाङ्मयानीहशास्त्राणि वाङ्निष्ठानि तथैव च
तस्माद्वाचः परं नास्ति वाग् हि सर्वस्यकारणम् !! -भरतमुनिः, नाट्यशास्त्रे, १५-३

८. अनादिनिधनंब्रह्म शब्दतत्त्वं यदक्षरम् !
विवर्ततेऽ र्थ भावेन प्रक्रिया जगतो यतः ॥ - महावय्याकरणो भर्तृहरिः वाक्यपदीये १-१

९. वनवृक्ष तदवच्छिन्नाकाशयोर्जलाशय तद्गत प्रतिबिम्बाकाश-वदनयोरज्ञानादुपहितचैतन्यतयोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते शिवमद्वैतं चतुर्थं मन्यन्त इत्यादि श्रुतेः!! वेदान्तसारः

१०. वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ !! रघुवंशमहाकाव्यम् १-१

११. वेदान्तेषु यमाहुरेकपुरूषं व्याप्य स्थितं रोदसी, यस्मिन्नीश्वर इत्यनन्यवषियः शब्दो यथार्थाक्षरः । अन्तर्यस्य मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते, स स्थाणुः स्थिर भक्तियोग सुलभोनिः श्रेयसायास्तु वः !!

१२. एकैश्वर्यस्थितोऽपि प्रणतबहुतलो यः स्वयं कृत्तिवासः
कान्ता सम्मिश्रदेहोऽप्यविषय मनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिबिभ्रतो नाभिमानः

सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ - मालविकाग्निमित्रम् १-१

१३. द्रवः संधातकठिनः स्थूलः सूक्ष्मो लधुर्गुरूः!
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु !! - कुमारसम्भवम् २-११

१४. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा यास्थिता व्याप्य विश्वम् ।
यामाहुः सर्ववीजप्रकृतिरिति याया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्तभिरष्टाभिरीशः ॥ - अभि.शा. १-१

१५. अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशलीगुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लाकेन चैतन्यमिवोष्णरश्मेः ॥ - रघु. महाकाव्यम् ५-४

१६. छान्दोग्योपनिषद् - ३-१४-१

१७. यं सर्वशैला परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे !
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम् !! कुमारसंभवम् १-२

१८. नृत्यं मयूराःकुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः।
तस्याः प्रयत्ने समदुःखभावमत्यन्तमासीद् रुदितं वनेऽपि !! - रघुवंशम् १४ - ६९

१९. स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिः प्रमुखवचनं स्वागतं व्याजहार !! मेधदूतम् - पूर्वभागः - ४

२०. मेघदूतम् पूर्वभागः - ५

२१. कुर्वन्सन्ध्याबलीपटहतांशूलिनः श्लाघनीया -
मामन्द्राणां कलमविकलं लप्स्यसे गर्जितानाम् ॥ पूर्वभेध - ३४

२२. द्र. मेघदूत - पूर्वभाग - ६०

२३. द्र. तस्योपान्ते कृतक तनयः कान्तया वर्धितो मे हस्त प्राप्यस्तवकनमि तो बालमन्दारवृक्षः ॥

२४. पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां, कच्चिद् भर्तुः स्मरसि रति के त्वं हि तस्य प्रियेति ।।

२५. अभिज्ञानशाकुन्तलम् ४-१४

२६. " " ४-५

२७. " " ४-१३

२८. पातुं न प्रथमं व्यवस्यति जलं युष्माषस्वपीतेषु या, नादत्ते प्रियमण्डनापि

भवतांस्नेहेन या पल्लवम्!
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः, सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम् !! - अभिशा. ९

२९. अनुमतगमना शकुन्तला, तरुभिरियं वनवासवन्धुमिः !
परभृत विरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥ ....शा. ४ - १०
यं प्रव्रजन्तमनुपेतमपेतमयं द्वैपायनो विरहकातर आजुहाव !
पुत्रैति तन्मयतया तरवोऽभिनेदुः तंसर्वभूतहृदयमुनिमानतोऽस्मि !! - श्रीमद्भागवतम् १-२-२

३०. भूया पथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः ॥ रघुवंश.. - १४-६-६

३१. इष्टान् देशान् विचरजलद प्रावृषा सम्भृत श्रीमाभूदेवं क्षणमपि यते विधुता विप्रयोगः ॥ उ. मेघ. ५२